Shri Raghunatha Temple MSS. Library,
JAMMU

No. ३४९ / घ

Title काव्यादर्शः

Author दण्डी

Extent ४६ पत्र Age

Subject अलङ्कार शास्त्र

© Dharmartha Trust J&K. Digitized by eGangotri

काव्यादर्शः

३५१

© Dharmartha Trust J&K. Digitized by eGangotri

कावी

गोपालबालीमंनसस्मरामः

॥ धूर्जटिं॥
न्यायबोधिनी
चंद्रिका॰

१२०

© Dharmartha Trust J&K. Digitized by eGangotri

३।

= सर्वाणि सर्वेषां महादीनां वा शास्त्राणि काव्याश्रयाणि। २ = उपमादीनामुदाहरणानि। २

= काव्यलक्षणमारममानस्तदधिष्ठात्रीं सरस्वतीं कीर्तयति। = जनव्यवहारः ४। २ = सर्वोक्तिमेव शब्दव्यापारं विना ... कमाह। इदमिति। = सर्वोऽप्ययं ... शुक्लोदास्याः सा। = का ...

= अतिदूरार्थे वाचां व्यवहारहेतुत्वं दर्शयति। ४ दीर्घं ... प्रसंगमभिधेयमाह।

= शाकटादीनां ३

श्रीगणेशायनमः॥ ॥चतुर्मुखमुखांभोजवनहंसवधूर्ममा मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥१॥ पूर्वशास्त्राणि संहृत्य प्रयोगानुपलक्ष्य चा यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणं॥२॥ इहशि-

ष्टानुशिष्टानां शिष्टानामपि सर्वथा॥ वाचामेव प्रसादेन लोकयात्रा प्रवर्त्तते॥३॥ इदमन्धंतमः कृत्स्नं जा-

येत भुवनत्रयं। यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥४॥ आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयं।

तेषामसंनिधानेपि न स्वयं पश्य नश्यति॥५॥ गौर्गौः कामदुघा सम्यक्प्रयुक्ता स्मर्यते बुधैः॥ दुष्प्रयु-

क्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति॥६॥ तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथंचन। स्याद्वपुः सुन्दरमपि श्विते-

= भाषाऽपभ्रंशादि दोषनिरूपणं प्रयोजनमाह। २

= अर्थतः शब्दतो वा। ~

राम॥

२

© Dharmartha Trust J&K. Digitized by eGangotri

णैकेन दुर्भगम्॥७॥ गुणदोषानशास्त्रज्ञः कथं विभजते जनः। किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिषु॥
८॥ अतः प्रजानां व्युत्पत्तिमभिसंधाय सूरयः। वाचां विचित्रमार्गाणां निबबंधुः क्रियाविधिं॥९॥ तैः शरी
रं च काव्यानामलङ्काराश्च दर्शिताः। शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली॥१०॥ पद्यं गद्यं च मिश्रं च तत्त्रिधैव व्य
वस्थितं। पद्यं चतुःपदी तच्च वृत्तं जातिरिति द्विधा॥११॥ छन्दोविचित्यां सकलस्तत्प्रपञ्चो निदर्शितः। सा वि
द्या नौर्विवित्सूनां गम्भीरं काव्यसागरम्॥१२॥ मुक्तकं कुलकं कोषः संघात इति तादृशः। सर्गबंधांशरूप
त्वादनुक्तः पद्यविस्तरः॥१३॥ सर्गबंधो महाकाव्यमुच्यते तस्य लक्षणं। आशीर्नमस्क्रिया वस्तुनिर्देशो वापि त

© Dharmartha Trust J&K. Digitized by eGangotri

=सर्गादिः — =परिच्छेदैः ४

सुखम् ॥१४॥ इतिहासकथोद्भूतमितरद्वा सदाश्रयम् । चतुर्वर्गफलोपेतं चतुरोदात्तनायकम् ॥१५॥
नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः । उद्यानसलिलक्रीडामधुपानरतोत्सवैः ॥१६॥ विप्रलंभैर्विवा
हैश्च कुमारोदयवर्णनैः । मंत्रदूतप्रयाणाजिनायकाभ्युदयैरपि ॥१७॥ अलंकृतमसंक्षिप्तं रसभावनिरन्त
रम् । सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसंधिभिः ॥१८॥ सर्व्वत्र भिन्नवृत्तान्तैरुपेतं लोकरंजनम् । काव्यं क
ल्पान्तरस्थायि जायते सदलंकृति ॥१९॥ न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दुष्यति । यद्युपात्तेषु सम्पत्तिराराधयति तद्विदः ॥२०॥ राम
गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम् । निराकरणमित्येष मार्गः प्रकृतिसुन्दरः ॥२१॥ २

=नायकवर्णनप्रकारमाह।

सर्गान्तैः २२

© Dharmartha Trust J&K. Digitized by eGangotri

=सत्यार्थाभिधायिना तदुक्ते गुणमात्रेण दोषाय इति भावः। ३

=गुणमतिप्रधानात् तद्गुणोत्कर्षे दोष इति

अमतमाह = अमात्यादिना। ३ पनमतेनव्याख्यातुमाह २ =आख्यायिकाभेदं दूषयति = अन्यतीत्यर्थः = आख्यायिकायामपि। ३ =पद्यमाख्यायामाह। १

वैशवीर्यश्रुतादीनि वर्ण्यमपि रिपोरपि। तज्जयान्नायकोत्कर्षकथनं च धिनोति नः॥२२॥ अपादः पदस

न्तानो गद्यमाख्यायिका कथा। इति तस्य प्रभेदौ द्वौ तयोराख्यायिका किल॥२३॥ नायकेनैव वाच्यान्या नाय

केनेतरेण वा। स्वगुणाविष्क्रिया दोषो नात्र भूतार्थशंसिनः॥२४॥ अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीर

णात्। अन्यो वक्ता स्वयं वेति कीदृग्वा भेदकारणम्॥२५॥ वक्त्रं चापरवक्त्रं च सोच्छ्वासत्वं च भेदकम्। चिह्नमाख्या

यिकायाश्चेत्प्रसंगेन कथास्वपि॥२६॥ आर्यादिवत्प्रवेशः किं न वक्त्रापरवक्त्रयोः। भेदश्च दृष्टो लम्भादिरुच्छ्वा

सो वास्तु किं ततः॥२७॥ तत्कथाख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता। अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः

नियमो भिन्नेदनिमित्ताह ३ प्रस्तावेन २ =उपसंहरति =भेदाभावात् आख्यायिकायां कथायां भेदं केवलं संज्ञाभिधानमर्थः =भेदकान्तरं दूषयति ३ छन्दोविशेषो ४ साधवा ३२ =उपकथादयः १ गाथा २

=आश्वासः परिच्छेदार्थस्ताघोमिता। ३

=लंभकादिप्राप्तो वा परिच्छेदार्थः किं ततो भेदो दृष्टः आश्वास

नजासरवेलर्थः। २

© Dharmartha Trust J&K. Digitized by eGangotri

उपाय:२

=महाकाव्यस्येव गद्यकाव्यस्यापि ... [illegible] । =कन्याहरणादयः पद्यकाव्यसाधारणा न तु पद्यकाव्य एवेति वक्रोक्त्या दर्शयति । =कवेर्भावो येनाभिप्रायेण कृते यथा भावि स्वप्रियास्मरणमिप्रायेण सर्गेषु [illegible] । =अन्यत्र [illegible] विजय [illegible] साधारण [illegible] कम [illegible] मिश्रमा [illegible]

दंडी० ३ ॥२८॥ कन्याहरणसंग्रामविप्रलंभोदयादयः। सर्गबंधसमा एव नैते वैशेषिका गुणाः॥२९॥ कविभाव
कृतं चिह्नमन्यत्रापि न दुष्यति। मुखमिष्टार्थसंसिद्धौ किं हि न स्यात्कृतात्मनां॥३०॥ मिश्राणि नाटकादीनि
तेषामन्यत्र विस्तरः। गद्यपद्यमयी कापि चम्पूरित्यभिधीयते॥३१॥ तदेतद्वाङ्मयं भूयः संस्कृतं प्राकृतं त
था॥ अपभ्रंशश्च मिश्रं चेत्याहुरार्याश्चतुर्विधं॥३२॥ संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः। तद्भवस्त
त्समो देशीत्यनेकः प्राकृतक्रमः॥३३॥ महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः। सागरः सूक्तिरत्नानां सेतुबंधा
दि यन्मयं॥३४॥ सौरसेनी च गौडी च लाटी चान्या च तादृशी। याति प्राकृतमित्येवं व्यवहारेषु संनिधिं॥३५॥ अप

रामः ३

© Dharmartha Trust J&K. Digitized by eGangotri

भीरादिगिरः काव्येष्वपभ्रंश इति स्मृताः। शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितम्॥३६॥ संस्कृतं सर्गबन्धादि
प्राकृतं स्कन्धकादि यत्। ओसरादिरपभ्रंशो नाटकादि तु मिश्रकम्॥३७॥ कथा हि सर्वभाषाभिः संस्कृतेन
च बध्यते। भूतभाषामयीं प्राहुरद्भुतार्थां बृहत्कथाम्॥३८॥ लास्यच्छलितसम्यादि प्रेक्षार्थमितरत्पुनः। श्र
व्यमेवेति सैषापि द्वयी गतिरुदाहृता॥३९॥ अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम्। तत्र वैदर्भगौडीयौ व
र्ण्येते प्रस्फुटान्तरौ॥४०॥ श्लेषः प्रसादः समता माधुर्यं सुकुमारता। अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः
॥४१॥ इति वैदर्भमार्गस्य प्राणा दशगुणाः स्मृताः। एषां विपर्ययः प्रायो लक्ष्यते गौडवर्त्मनि॥४२॥ श्लिष्टमस्पृष्ट

© Dharmartha Trust J&K. Digitized by eGangotri

=मृदु= सुकुमारवर्णविन्यासजन्मा मृदुः १ कठोरवर्णविन्यासजन्मा स्फुटः २ द्विप्रकारवर्णविन्यासजन्मा मध्यमः ३ ४

=वैषम्यसमेनेत्यर्थः ४ =अनृजु इति हेतोर्लेशप्रसिद्धमपीष्यते ३ ति ३ =वैयाकरणः ४ =अनतिशुक्लाम्बुजन्मनीलोत्पलैस्तत्तुल्योऽङ्को यस्य २

दं॰ द॰ १० ४ शैथिल्यमल्पप्राणाक्षरोत्तरम् । शिथिलं मालतीमालालोलालिकलिला यथा ॥ ४३ ॥ अनुप्रासधिया गौ

डैस्तदिष्टं बन्धगौरवात् । वैदर्भैर्मालतीदाम लंघितं भ्रमरैरिति ॥ ४४ ॥ प्रसादवत्प्रसिद्धार्थमिन्दोरिन्दीवरद्यु

ति । लक्ष्म लक्ष्मीं तनोतीति प्रतीतिसुभगं वचः ॥ ४५ ॥ व्युत्पन्नमिति गौडीयैर्नातिरूढमपीष्यते । यथात्यर्जु

नाब्जन्मसदृक्षांको वलक्षगुः ॥ ४६ ॥ समं बन्धेष्वविषमं ते मृदुस्फुटमध्यमाः । बन्धा मृदुस्फुटोन्मिश्रवर्णवि

न्यासयोनयः । कोकिलालापवाचालो मामेति मलयानिलः । उच्छलच्छीकराच्छाच्छनिर्झराम्भःकणोक्षितः ॥ ४ रामा ।

चन्दनप्रणयोद्गन्धिर्मन्दो मलयमारुतः । स्पर्धते रुद्धमद्धैर्यो वररामामुखानिलैः ॥ ४८ ॥ इत्यनालोच्य वैषम्य ४

=मध्यमोदाहरणम् । =मृदूदाहरणम् २ =स्फुटोदाहरणम् । २

=अयं भावः यदि सर्वाणि पद्यानि मृदुबन्धेन तदा सर्वाण्यपि तथा कार्याणि १ अथोत्तराणि स्फुटानि तदा सर्वाण्यपि तथा । एवं च चन्दनप्रणयोद्गन्धिरिति पादे कठो

रबन्धेन प्रारब्धो ... नसर्वाणि ... तथा न तथा तस्मात्स्फुटोदाहरणत्वेनासमत्वमिति । =

© Dharmartha Trust J&K. Digitized by eGangotri

तो

=श्रवणयोर्मूर्द्धन्यत्वात् उ ययोस्तालव्यत्वात् दलयोर्दन्त्यतात्समश्रुतित्वं २ = येन केनापि श्रुतिप्रकोपाताद्रूप्यश्रुत्या स्थानकरणप्रयत्नसाम्येन वा। तत्र तालव्यविशेषात् उकारयकारौ कारणविभ्रमात् यनलवादयः४। प्रयत्नभेदात् ॥ अनुप्रासात् ॥ आहृत्यानी

=एवं प्रकारं माधुर्यं गौडैर्नाद्रियते पनमनुप्रासकृतमेव माधुर्यमिच्छन्तीत्यर्थः॥४

=राष्ट्रडम्बरः ॥ डंबरः॥। =गौडीयानुप्रासः इति॥।

=वर्णानामनुच्चारणं॥४

थीलंकारडंवरो ऽपेक्ष्यमाणा वद्धे पौरस्त्यकाव्यपद्धतिः ॥५०॥ मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः ॥

येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः ॥५१॥ यया कयाचिच्छ्रुत्या यत्समानमनुभूयते। तद्रूपादिपदासत्तिः

सानुप्रासा रसावहा ॥५२॥ एष राजा यदा लक्ष्मीं प्राप्तवान्ब्राह्मणप्रियः। तदाप्रभृति धर्मस्य लोकेऽस्मिन्नुत्सवो

ऽभवत् ॥५३॥ इतीदं नादृतं गौडैरनुप्रासस्तु तत्प्रियः। अनुप्रासादपि प्रायो वैदर्भैरिदमीप्सितम् ॥५४॥ वर्णावृत्ति

रनुप्रासः पादेषु च पदेषु च। पूर्वानुभवसंस्कारबोधिनी यद्यदूरता ॥५५॥ चंद्रे शरन्निशो[redacted]कुंदस्तवकविभ्र

मे इंद्रनीलनिभं लक्ष्म संदधात्यलिनः श्रियं ॥५६॥ चारु चांद्रमसं भीरु पश्यैदं विम्बमम्बरे मन्मनो मन्मथ

=मधुव्रतो मधुकरो मधुलिट् ॥ भ्रमरः ॥ अलिन इत्यमरः॥ =निकटत्वे॥२ =सर्वत्रयादनकानदकारसंयोगाहति॥।२

=परेषु वर्णावृत्तिरिति। आद्यो भेदो दिवकारस्य। द्वितीये संयोगस्य। तृतीये तेषां च। चतुर्थे दकारस्येति॥।

पदानां यानुप्रासः इति॥ सा रसावहा। तस्यैव वदि रसो न त्वन्यतीत्यर्थः॥ अनुप्रासोऽपि तेष्वेव भवतीति भावः॥।२

तंसे २

© Dharmartha Trust J&K. Digitized by eGangotri

=सर्वोऽपि तु वर्णस्तु कुमारेण रामस्य रायोगात् शैथिल्ययोगाद्दाक्षिणात्यैरेनमनुप्रासमिच्छन्ति । प्राच्यास्तु त्विच्छन्ति ॥ २
=वैदर्भसम्मतानुप्रासप्रत्युदाहरणमिदं । अत्र प्रथमस्य विसर्जरेफस्य खकारस्य च । द्वितीये कस्य विसर्जस्य । तृतीये तोकारस्य । चतुर्थे ककारफोरावृत्तिः ॥ २ =वर्णसमुदायविषया । इति त्रियमकमित्यर्थः ॥ ३ =अन्यस्तु यमकानुप्रासौ च शब्दालंकारौ न त्वनुगुणौ तान्याभ्यां विना विकोचदर्शनात् तदृत्तिरायस्तु तान्याश्रितयतो ॥ २
=रामा वदनसरोजसदृशश्चन्द्र इत्यनुप्रासः इत्यर्थः ॥

ड १० कान्तं निर्द्दयं हन्तुमुद्यतं ॥ ५७ ॥ इत्यनुप्रासमिच्छन्ति नातिदूरान्तरश्रुतिं । न तु रामामुखाम्भोजसदृशश्चन्द्रम
५ इति ॥ ५८ ॥ स्मरः खरः खलः कान्तः कायः कोपश्च नः कृशः । च्युतो मानोऽधिको रागो मोहो जातोऽसवो गताः
॥ ५९ ॥ इत्यादि बन्धपारुष्यं शैथिल्यं च नियच्छति । अतो नैवमनुप्रासं दाक्षिणात्याः प्रयुञ्जते ॥ ६० ॥ आवृत्तिम्
वर्णसंघातगोचरां यमकं विदुः । तत्तु नैकान्तमधुरमतः पश्चाद्विधास्यते ॥ ६१ ॥ कामं सर्वोऽप्यलंकारो रसमर्थे
निषिञ्चति । तथाप्यग्राम्यतैवैनं भारं वहति भूयसा ॥ ६२ ॥ कन्ये कामयमानं मां न त्वं कामयसे कथं । इति ग्रा २३
म्योऽयमर्थात्मा वैरस्याय प्रकल्पते ॥ ६३ ॥ कामं कन्दर्पचाण्डालो मयि वामाक्षि निर्द्दयः । त्वयि निर्मत्सरो दिष्ट्या राम ॥
५

=साधानलक्षणम् ॥ २ =न त्वनुराद्दतो मधुरं नार्थितः इति नात्यर्थं मधुरे मधुरमक्रमात् इह दर्शितमिति भावः ॥ ३
=अर्थाग्राम्यतामाह ।
=अथ यावतामपि अलंकाराणां व्यापारस्तु तदर्थः ॥ ३
=ग्राम्यतापाश्रयस्य रसदोषशब्दे रीतिद्वैधस्य माह ॥ २

© Dharmartha Trust J&K. Digitized by eGangotri

ष्येसग्राम्योर्थोरसावहः ६४ शब्देपिग्राम्यतास्त्येवसासभ्येतरकीर्तनात्‌यथायकारादिपदंरत्युत्सवनिरूपणे ६५ पदसंधान
वृत्त्यावावाक्यार्थत्वेनवापुनः। दुःप्रतीतिकरंग्राम्यंयथायाभवतःप्रिया ६६ खरंप्रहृत्यविश्रान्तःपुरुषोवीर्यवानिति।ए
वमादिनशंसन्तिमार्गयोरुभयोरपि ६७ भगिनीभगवत्यादिसर्वत्रैवानुमन्यते। विभक्तमितिमाधुर्यमुच्यतेसुकुमारता
६८ अनिष्ठुराक्षरप्रायंसुकुमारमिहेष्यते। बंधशैथिल्यदोषोहिदर्शितःसर्वकोमले ६९ मंडलीकृत्यबर्हाणिकंठैर्म
धुरगीतिभिः। कलापिनःप्रनृत्यन्तिकालेजीमूतमालिनि ७० इत्यनूर्जितएवार्थोनालंकारोपितादृशः सुकुमारतयैवैतदा

© Dharmartha Trust J&K. Digitized by eGangotri

ह० डी० रोहतिसतांमुखं ७१ हीप्रिमसपेौर्भन्वाक्रच्छोघमपिबध्यते। मसेरापसः सपितः क्षत्रियाणां क्षणादिति ७२ अर्थेऽ। १ परशुरामे
६ क्षिरने यत्नमर्थस्य हरिणाहृता। मंखुर सुस्मनागास्र लोहिता दुरुधेरिति ७३ महीमहाव ए हेणलोहिताद्दुहूतोऽस्थे ग
इतीपसेवनिर्दिष्टेनेयत्नमरगासृजः ७४ नेहृशंबकुमसंतेमार्गयोउभयोरपि। नहिमतीतिः सुभगा शब्दमायविलंबिनी।।
6 ७५ उत्कर्षवानगुणः कश्चिदस्मिन्तुक्तेमतीयते। तदुदाराक्षपंतेनसनाथ्याकाव्यपद्धतिः ७६ अर्थिनां कृपणा दृष्टिस्त्वन्मुखेप राम
तितासकृतां तहवस्थाउनर्ईवनाम्नस्यमत्वमीक्षते ७७ इतिसागस्य वाक्येऽस्मिन्नुत्कर्षः साधुलक्ष्यते। अनेनैवपथान्यद्बहुसमानमा ६
यमस्यतो ७८
दीना

© Dharmartha Trust J&K. Digitized by eGangotri

=मतन्नेदमाह।

=अत्र नीलक्रीडा हेम्नां विशेषणानां स्मृता।

साद्यैर्विशीर्णसौधैः सुरुकं मुदास्वं कैश्चिद्दिष्यते। यथानीता कुञ्जक्रीडासरो हेमाङ्गदाद्यः॥ ७९॥ ऊर्जस्समानं

यस्त्वमेतज्जयस्यजीवितं। पद्योद्यदाद्रिरणात्यानामिद्दमेकं परायणं॥ ८०॥ तत्कुड्मलं लहरणां स्ववाञ्छल्यान्त्व

वमिश्रणैः उद्धावबप्रकास्थास्य स्वशपमोरथ्यायिकादिशु॥ ८१॥ अस्तमस्तकपर्यस्तसमस्ताकंक्षिसंहारपीनस्तु

नच्छितातातामुक्तबध्वेवबाउणी॥ ८२॥ इतिपद्येपिपीरस्यावधूत्योजस्विनी गिरिः। अन्येर्वनाकुलं हृद्यमिहं

त्योजौगिरायथा॥ ८३॥ पयोधरस्तटोत्सङ्गगलयसंधातिपांसुका। कस्यकामातुरं चेतोवाउणी नकरिष्यति॥ ८४॥

कांतसर्वजगत्कांतं लौकिकार्थानतिक्रमात्। तच्चवार्त्ताविधानेष्ववसिनाथपिदृश्यते॥ ८५॥ रहाणिनामता।

© Dharmartha Trust J&K. Digitized by eGangotri

दे॰ डी॰ ७

नैवं तपोराशिरयं विहङ्गः संतापयति यश्चैवं स पावनैः पादपांशुभिः ॥ ०६ ॥ अनयोरन्यवघ्नांगिरश्चनयोर्हि
समागमयोः अवकाशो न पर्याप्तः स्वच्छवाकूलतां तरे ॥ ०७ ॥ इति मृगाक्षमेवैतद्विशेषाख्यानसंस्तुतं कांतं स
वति सर्वस्य लोकस्य चानुवर्त्तिनः ॥ ०८ ॥ लोकातीतं च वात्यर्थमप्यारोप्यविवक्षितः । यो र्थः स्वेनाति त्वस्य
तिविद्ध्यानितरे जनाः ॥ ०९ ॥ देवधिष्ण्यमिवाराध्यमद्यप्रभृति नो गृहं युष्मत्पादरजःपातधौतनिःशेषक
ल्मषं ॥ १० ॥ अल्पं निमितमाकाशमनालोच्यैव वेधसा इदमेवंविधं ताविन्नवत्यगंगनमण्डलं ॥ ११ ॥ इदमत्तु रामा। ७
क्षितिस्तु क्रमेत मैडोपलालितां प्रस्थानं प्राक्पुनीतं तु सारमन्यस्य वर्त्मनः ॥ १२ ॥ अत्र च धर्मस्मृतौ यत्र लो

प्रकारः १ अनयोरनवद्यागि । देवधिष्ण्यामिवोत १ यदर्मस्य १ जंमनंर२

© Dharmartha Trust J&K. Digitized by eGangotri

कसीमानुवर्त्तिना ॥ सम्यगाधीयते यत्र स समाधिरुदाहृतः ॥ ९३ ॥ कुमुदानि निमीलन्ति कमलान्युन्मिष
न्ति चा इति नेत्रक्रियाध्यासाल्लब्ध्यते वाचिनी श्रुतिः ॥ ९४ ॥ निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयं ॥ अति
सुंदरमन्यत्तु ग्राम्यकक्षां विगाहते ॥ ९५ ॥ पद्मान्यर्कांशुनिष्ठ्यूताः पीत्वा पावकविप्रुषः ॥ भूयो वमन्तीव मुखै
उद्गीर्णारुणरेणुभिः ॥ ९६ ॥ इति हृद्यमहृद्यं वा निष्ठीवति वधूरिति ॥ युगपन्नैकधर्म्माणामध्यासश्च मतो
यथा ॥ ९७ ॥ गुरुगर्भभरक्लान्ताः स्तनन्त्यो मेघपंक्तयः ॥ अचलाधित्यकोत्संगमिमाः समधिशेरते ॥ ९८ ॥ उ
संगशयनं सख्याः स्तननं गौरवं क्लमः ॥ इतीमे गर्भिणीधर्म्मा बहवोप्यत्र दर्शिताः ॥ ९९ ॥ तदेतत्काव्यसर्व

© Dharmartha Trust J&K. Digitized by eGangotri

का०
८
८

स्वं समाधिर्नाम यो गुणः ॥ कविसार्थः समग्रोऽपि तमेनमनुगच्छति ॥१००॥ इति मार्गद्वयं भिन्नं तत्स्वरूपनि
रूपणात् ॥ तद्भेदास्तु न शक्यन्ते वक्तुं प्रतिकवि स्थिताः ॥१०१॥ इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत् ॥ तथा
पि न तदाख्यातुं सरस्वत्यापि शक्यते ॥२॥ नैसर्गिकी च प्रतिभा श्रुतं च बहुनिर्मलं ॥ अमंदश्चाभियोगोऽस्याः का
रणं काव्यसंपदः ॥३॥ न विद्यते यद्यपि पूर्ववासना गुणानुबंधि प्रतिभानमद्भुतं ॥ श्रुतेन यत्नेन च वागुपा
सिता ध्रुवं करोत्येव कमप्यनुग्रहम् ॥१०४॥ तदस्ततंद्रैरनिशं सरस्वती श्रमादुपास्या खलु कीर्तिमीप्सु
भिः ॥ कृशे कवित्वेऽपि जनाः कृतश्रमा विदग्धगोष्ठीषु विहर्तुमीशते ॥१०५॥ ॥ इति प्रथमः परिच्छेदः ॥ ॥

काव्याद० ३
राम ॥
८

© Dharmartha Trust J&K. Digitized by eGangotri

=अलंकारानाह।१ =काव्येऽर्थात्मनि अर्थधर्मत्वादलंकाराणां श्लेषादयो गुणाः शब्दार्थधर्मा इति भेदः।१ =गुणान्तरोदाहरणादिना योजयिष्यति।२ =नन्वर्थगतो विधर्मो माधुर्यकान्त्यादिः प्रागुक्त एव सोऽपि तर्ह्यलंकारत्वादिह वाच्य इत्याह।२
निदानम्।२ =तेऽर्थधर्मा अपि न साधारणा इदानीं तु वर्ण्यन्ते इयत्साधारणमलंकारमाह।३ नहि तेषां किमात्मेत्याह।

काव्यशोभाकरान्धर्मानलंकारान्प्रचक्षते॥ ते चाद्यापि विकल्प्यन्ते कस्तान्कार्त्स्न्येन वक्ष्यति॥१॥ किंतु
बीजं विकल्पानां पूर्वाचार्यैः प्रकल्पितं॥ तदेव प्रतिसंस्कर्तुमयमस्मत्परिश्रमः॥२॥ काश्चिन्मार्गविभागार्थमुक्ताः
प्रागप्यलंक्रियाः॥ साधारणमलंकारजातिमन्यत्प्रदर्श्यते॥३॥ स्वभावाख्यानमुपमा रूपकं दीपकावृती॥ आ
क्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना॥४॥ समासातिशयोत्प्रेक्षा हेतुः सूक्ष्मो लवः क्रमः॥ प्रेयो रसवदूर्ज
स्वि पर्यायोक्तिः समाहितं॥५॥ उदात्तापह्नुतिश्लिष्टविशेषास्तुल्ययोगिता॥ विरोधाप्रस्तुतस्तोत्रे व्याजस्तु
तिनिदर्शने॥६॥ सहोक्तिः परिवृत्याशीः संकीर्णमथ भाविकं॥ इति वाचामलंकाराः दर्शिताः पूर्वसूरिभिः॥

© Dharmartha Trust J&K. Digitized by eGangotri

=जातिस्वभावोदाहरणं तुंडादयश्च शुकावयवाः २ मादे जातिर्ज्ञः २
कुर्वन्~
=जातिगुणक्रियाभिदेन चतुष्प्रकारके।१ =पक्षैर्वृहद्भित्वा ३ =त्रयोवर्णाया सो नाहृशो राजयो येषां २ =अत्र तुंडैर्वने क्रिया ३ =गुणस्वभावमुदाहरति २ क्रियास्वभावमुदाहरति २ कंजोऽयं क्रमशुरः ४।२ उपनत्कणितवा।२

दंडी० ९ ॥७॥ नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वती। स्वभावोक्तिश्च जातिश्चेत्याद्या सालंकृतिर्यथा॥८॥ तुंडैरा
ताम्रकुटिलैः पक्षैर्हरितकोमलैः। त्रिवर्णराजिभिः कंठैरेते मंजुगिरः शुकाः॥९॥ कलक्वणितगर्भेण कंठे
१ नाघूर्णितेक्षणः। पारावतः परिभ्रम्य रिरंसुश्चुंबति प्रियां॥१०॥ वध्नन्नंगेषु रोमांचं कुर्वन्मनसि निर्वृतिं नेत्रे चा
=अयं गुणः ४
मीलयन्नेष प्रियास्पर्शः प्रवर्त्तते॥११॥ कंठेकालः करस्थेन कपालेनेन्दुशेखरः। जटाभिः स्निग्धताम्राभिरावि
रासीद्वृषध्वजः॥१२॥ जातिक्रियागुणद्रव्यस्वभावाख्यानमीदृशं। शास्त्रेष्वस्यैव साम्राज्यं काव्येप्येतदीप्सितं॥ राम॥ ९
१३। यथाकथंचित्सादृश्यं यत्रोद्भूतं प्रतीयते। उपमा नाम सा तस्याः प्रपंचोयं प्रदर्श्यते॥१४॥ अंभोरुहमि

=अस्पष्टव्यता २ =द्रव्यमुदाहरति २ =यत्र स्वगुणेन हीनगुणं सादृश्यमानीयते यथा सोपमा १ =एकाविपत्नी २
=लोकिकैकल्पितैर्वा धर्मादिनिर्दिष्टो सत्सादृश्यं १

© Dharmartha Trust J&K. Digitized by eGangotri

=उभयोरेवोपमेयस्योपमानत्वात् ।२

=अंभोरुहमिवेत्युक्ते करतलधर्मस्योपमितत्वात् ।१ =अन्योपमाननिषेधादित्यर्थः ।४ =प्रसिद्धयोरुपमानोपमेययोर्विपरीतत्वात् =आवयोर्धर्मयोरनुपादानात् ।१

वाताम्रं मुग्धे करतलं तव । इयेति धर्मोपमा साक्षात्तुल्यधर्मनिदर्शनात् ॥ १५ ॥ राजीवमिव ते वक्त्रं नेत्रे नीलोत्प
ले इव । इति प्रतीयमानैकधर्मा वस्तूपमैव सा ॥ १६ ॥ त्वदाननमिवाम्भोजमम्भोजमिव ते मुखं । इत्यन्योन्योपमा
सेयमन्योन्योत्कर्षशंसिनी ॥ १७ ॥ त्वदाननमिवोन्निद्रमरविंदमभूदिति । सा प्रसिद्धिविपर्यासाद्विपर्यासोप =पद्मोत्कर्षकर्मवा
मेष्यते ॥ १८ ॥ त्वन्मुखं कमलेनैव तुल्यं नान्येन केनचित् । इत्यन्यसाम्यव्यावृत्तेरियं सा नियमोपमा ॥ १९ ॥ पद्मं ता
वत्तवान्वेति मुखमन्यच्च तादृशं । अस्ति चेदस्तु तत्कारीत्यसावनियमोपमा ॥ २० ॥ समुच्चयोपमाप्यस्ति न कान्त्यै
व मुखं तव । ह्लादनाख्येन चान्वेति कर्मणेन्दुमितीदृशी ॥ २१ ॥ त्वय्येव त्वन्मुखं दृष्टं दृश्यते दिवि चन्द्रमाः । इय

=चंद्रादि २ =पद्मतुल्यं २ =त्वन्मुखानुगमकारित्वमुखानुगमकारित्वेत्यर्थः ।

=चंद्रानुगमने शोभादिनस्य हेतुद्वयस्य दर्शितत्वात् ।२ =अन्या प्रतिषेधादित्यर्थः ।२

© Dharmartha Trust J&K. Digitized by eGangotri

स्ववशीनयामि०

×पेद्मे ३

=अपनमोर्षेन्नुविकत्थनस्योत्प्रेक्षणात्॥२ =आस्ययमात्रकृतो भेदो नवावण्यादिगुणैरित्यतिशयकथनादित्यर्थः॥१

=त्वन्मुखे चैन्द्रमाः ऽऽइन्मुखभ्रमादिति भावः॥३

=स्ववशीनयामि

उद्भुत २२ =उन्नतभ्रूभङ्गादेः पद्मेऽसम्भवस्याश्चर्यहेतुत्वादिति भावः॥२ =आखण्डाभिः॥१ तेनसैकम्चकरणात्॥४

दं॰डि॰ १०
१०

त्येव भिदा नान्येत्यसावतिशयोपमा॥२२॥मय्येवास्या मुखश्रीरित्यलमिन्दोर्विकत्थनैः।पद्मेऽपि सा यदस्त्येवे
त्यसावुत्प्रेक्षितोपमा॥२३॥यदि किंचिद्भवेत्पद्मं सुभ्रु विभ्रान्तलोचनं।तत्ते मुखश्रियं धत्तामित्यसावद्भुतोप
मा॥२४॥शशीत्युत्प्रेक्ष्य तन्वङ्गि त्वन्मुखं त्वन्मुखाशया।इन्दुमप्यनुधावामीत्येषा मोहोपमा मता॥२५॥किं पद्म
मन्तर्भ्रान्तालि किं ते लोलेक्षणं मुखं।मम दोलायते चित्तमितीयं संशयोपमा॥२६॥न पद्मस्येन्दुनिग्राह्यस्येन्दु
लज्जाकरी द्युतिः।अतस्त्वन्मुखमेवेदमित्यसौ निर्णयोपमा॥२७॥शिशिरांशुप्रतिद्वन्द्वि श्रीमत्सुरभिगन्धि च।अम्भो रम॥
जमिव ते वक्त्रमिति श्लेषोपमा मता॥२८॥सरूपशब्दवाच्यत्वात्सा समानोपमा यथा।बालेवोद्यानमालेयं १०॥

तद्विजेत्री २ =चन्द्रविजयरूपविशेषदर्शनात्॥२ =श्लेषेण साम्यकथनात्॥२ =एकपक्षावधारणाभावादिति भावः॥३ शोभाकमलाश्रयत्वात्॥२

=कान्त्याऽभिभवनीयत्वात्संकोचकारित्वाच्च॥२

=कविभिः दानोपमेति पाठस्तत्र सैदानीं यद्वानुसृत्वी॥तया १

© Dharmartha Trust J&K. Digitized by eGangotri

=सालकाननं सालानां सर्जतरूणां काननं तेन शोभत इति तथा न चखे सोपमाऽभेद ४॥ इ मात्र साम्यं न तु गुणाधानमत्रेति पन ४।

=कथयितुमिच्छु ३

विनउत्कर्षवाभूमिसर्पणावादित्यर्थः ४। =पद्मचंद्रयोर्द्विपर्ययेन निघात्वादिति भावः ।

सालकाननशोभिनी॥२९॥ पद्मं वहुरजश्चंद्रः क्षयी ताभ्यां तवाननं। समानमिति सोत्कर्षमिति निंदोपमा मता॥
३०॥ ब्रह्मणोप्युद्भवः पद्मः चंद्रः शंभुसिरोधृतः। तौ तुल्यौ त्वन्मुखेनेति सा प्रशंसोपमेष्यते॥३१॥ चंद्रेण त्वन्मुखं तु
ल्यमित्याचिख्यासु मे मनः। स गुणो वास्तु दोषो वेत्याचिख्यासोपमा मता॥३२॥ शतपत्रं शरच्चंद्रस्त्वदाननमिति
त्रयं। परस्परविरोधीति सा विरोधोपमा मता॥३३॥ न जातु शक्तिरिंदोस्ते मुखेन प्रतिगर्जितुं। कलंकिनो जड
स्येति प्रतिषेधोपमा मता॥३४॥ मृगेक्षणांकं ते वक्त्रं मृगेणैवांकितः शशी। तथापि सम एवासौ नोत्कर्षीति च
टूपमा॥३५॥ न पद्मं मुखमेवेदं न भृंगौ चक्षुषी इमे। इति विस्पष्टसादृश्यात्तत्त्वाख्यानोपमा मता॥३६॥ चंद्रारविं

=पद्मचंद्रयोः सहानवस्थानान्मुखेन तयोर्विजयादिति भावः ३

=कलंकिनो लक्ष्मसापवादस्य ताच जडः शीतोऽलस स्वाच्छपत्र ह्री नोस्ति नयपि निषेधस्य वाच्यत्वात् प्रतिषेधोपमा यतोऽपस्यवाच्यत्वादिति भेदः ४।२

=निर्णयोपमायां हेतूपन्यास इति भेदः। सापोतत्व भेद... प्रतिषेधोपमा। =प्रत्यक्षे साहश्यकथनादित्यर्थः ४।१

सादृश्ये २ =मुगतदेकदेशाभ्यामंकितयोनापि न विशेष इति चाटूक्ते ४।२

© Dharmartha Trust J&K. Digitized by eGangotri

=अत्र विशेषः अभूतोपमायां तु नास्ति ... सर्वता । ३

=एकत्र प्रभासमाहारकथनान्नूनेयमद्भुतोपमा भूतगादेः प्रतिगोचनस्य ... इत्यद्भुतत्वोपाधेर्भेदात् समाहारस्यैव तन्नानामप्येकत्र भवति । २

=एकस्यैव मुखस्यान्यतौल्यप्रविषेधायोपमेयत्वमुपमानत्वं चारोपितमित्यन्यस्य साधारणस्याभावादिति भावः ... नियमोपमा तत्र पानमार्थिकोपमानस्यैव ... । गगनं गगनाकारमित्यादौ निषेधस्य विद्यमानत्वेऽपि

द्वि० ११

द्वयोः कक्ष्यामतिक्रम्य मुखं तव । आत्मनैवाऽभवत्तुल्यमित्यसाधारणोपमा ॥३७॥ सर्वपद्मप्रभासारः समाहृ

त इव क्वचित् । त्वदाननं विभातीति तामभूतोपमां विदुः ॥३८॥ चन्द्रबिम्बादिव विषं चन्दनादिव पावकः । परुषा

वागितो वक्त्रादित्यसंभावितोपमा ॥३९॥ चन्दनोदकचन्द्रांशुचन्द्रकान्तादिशीतलः । स्पर्शस्तवेत्यतिशयं प्रथ

यन्तीव बहूपमा ॥४०॥ चन्द्रबिम्बादिवोत्कीर्णं चन्दनादिव निर्मितं । तव तन्वंगि वदनमित्येषा विक्रियोपमा ॥४१॥ राम ॥

पूष्ण्यातप इवाह्नीव पूषा व्योम्नीव वासरः । विक्रमस्त्वय्यधाल्लक्ष्मीमिति मालोपमा मता ॥४२॥ वाक्यार्थेनैव ११

वाक्यार्थः कोऽपि यद्युपमीयते । एकानेकेवशब्दत्वात्सा वाक्यार्थोपमा द्विधा ॥४३॥ त्वदाननमधीराक्षमावि

पद्मगर्भादिवोद्धृतं द्वि: ॥ ३

© Dharmartha Trust J&K. Digitized by eGangotri

दृश्यानदीधिभि॥ स्पन्देगामिवालक्ष्यकेशरंतातिपंकजं॥४४॥ नलिन्याइवतन्वंग्यास्तस्याः पद्ममिवाननं। मयामधु
व्रतेनेवपायंपायमरम्यत॥४५॥ वस्तुकिंचिदुपन्यस्यतत्तुल्यस्यान्यवस्तुनः। साम्यप्रतीतिरस्तीतिप्रतिवस्तूपमा
यथा॥४६॥ नकोऽपित्वादृशोऽद्यापिदृश्यमानेषुराजसु। ननुद्वितीयोनास्त्येवपारिजातस्यपादपः॥४७॥ अधि
केनसमीकृत्यहीनमेकक्रियाविधौ। यद्ब्रुवन्तिस्मृतासेयंतुल्ययोगोपमायथा॥४८॥ शिष्टोजागर्त्तिरक्षायैभुवलो
मारिःभुवोलवाड्। असुरास्तेनहन्यन्तेसावलेपास्त्वया॥४९॥ कान्त्याचंद्रमसंधाम्नासूर्यंधैर्येणचार्णवं।राज
न्ननुकरोषीतिसैषाहेतूपमामता॥५०॥ नलिंगवचनेभिन्नेनन्यूनाधिकतापिवा उपमादूषणायालंयत्रोद्वेगो

© Dharmartha Trust J&K. Digitized by eGangotri

दंडा० १२ 12 नधीमतां ॥५१॥ श्रीवेणागह्वतिरवैदोयेयंवक्रो भाश्रीतुमाभिवं ॥ प्राणाश्वद्विपयोऽयंमेविद्याक्षर्नमिवार्जिता ॥५२॥
रवानिदमहीपालदेवराजोविराजते । बलसंख्यमलःकान्तिमंरोहुतेजसाहरपः ॥५३॥ इत्येवमादिसोतागएंन
जहात्येवक्रतावचिरः ॥ यम्बिवकारि उद्वेगः प्रयोगेवाग्मिदांयथा ॥५४॥ हंसीवधवलःश्चन्द्रः सरांसीवामलनतः
रर्दतस्कोतटश्चेवरवद्योतोनातिसाधुमत ॥५५॥ इदेशंवक्र्ययितेमाद्धिःकारणांतवंचितंत्यतां । गुणदोषविच
रायस्वयमेवमनीषिणः ॥५६॥ इववद्वाययथाशब्दाः समाननिलसन्निभाः । तुल्यसंकाशनीकाशप्रकाश राम ॥
प्रतिरूपकाः ॥५७॥ प्रतिपक्षप्रतिद्वंद्विप्रत्यनीकविरोधिनः । सदृक्सदृशसंवादिसजातीयानुवादिनः ॥५८॥ १२

मिः२

© Dharmartha Trust J&K. Digitized by eGangotri

विंब१ प्रति२ संमिताः३ तुल्यार्थ२२

प्रतिबिंबप्रतिच्छंदः सरूपसमसंमिताः। सलक्षणसदृक्षाभसपक्षोपमितोपमाः। कल्पदेशीयदेश्यादिः प्रख्य

प्रतिनिधी अपि।। सवर्णतुलितौ शब्दौ ये चान्यूनार्थवादिनः। समासश्च वहुव्रीहिः शशांकवदनादिषु।।६०।। स्प

र्द्धते जयति द्वेष्टि द्रुह्यति प्रतिगर्जति। आक्रोशत्यवजानाति कदर्थयति निंदति।।६१।। विडंवयति संधत्ते हसतीर्ष्य

त्यसूयति। तस्य मुष्णाति सौभाग्यं तस्य कांतिं विलुंपति।।६२।। तेन सार्द्धं विगृह्णाति तुलां तेनाधिरोहति। तत्पदव्यां प

दं धत्ते तस्य कक्षां विगाहते।।६३।। तमन्वेत्यनुवध्नाति तच्छीलं तन्निषेधति। तस्य चानुकरोतीति शब्दाः सादृश्य

सूचिनः।।६४।। ।।उपमाचक्रम्।। ।।उपमैव तिरोभूतभेदा रूपकमिष्यते। यथा वाहुलता पाणिपद्मं चरणपल्ल

रूपकान् १

© Dharmartha Trust J&K. Digitized by eGangotri

कांचिन्नापि कां प्रति कस्यचिन्नामकस्येयं वाचोयुक्तिः

दंडी० २९ 13

वं ॥ ६५ ॥ अंगुल्यः पल्लवान्यासंकुसुमानि नखार्चिषः । बाहू लते वसंतश्रीस्त्वं नः प्रत्यक्षचारिणी ॥ ६६ ॥ इत्येत
दसमस्ताख्यं समस्तं पूर्वरूपकं । स्मितं मुखेंदोर्ज्योत्स्नेति समस्तव्यस्तरूपकं ॥ ६७ ॥ ताम्रांगुलिदलश्रेणि न
खदीधितिकेसरं । ध्रियते मूर्ध्नि भूपालैर्भवच्चरणपंकजं ॥ ६८ ॥ अंगुल्यादौ दलादित्वं पादे चारोप्य पद्मतां ॥ त
द्योग्यस्थाननिर्देशादेतत्सकलरूपकं ॥ ६९ ॥ अकस्मादेव ते चंडि स्फुरिताधरपल्लवं । मुखं मुक्तारुचो धत्ते घ
र्माम्भःकणमंजरीः ॥ ७० ॥ मंजरीकृत्य घर्माम्भः पल्लवीकृत्य चाधरं । नान्यथाकृतमत्रास्यमतोऽवयवरूपकं ॥ ७१ ॥ राम ॥
वल्गितभ्रु गलद्घर्मजलमालोहितेक्षणं । विवृणोति मदावस्थामिदं वदनपंकजं ॥ ७२ ॥ अविकृत्य मुखांगानि २९

स्वमेवारविंदताश्रा आसीज्जपितमप्येदं मतो वधविद्रूपकं ॥७३॥ मदपाटलगंडेन रक्तनेत्रोत्पलेन ते। मुखेन मुग्धे सोऽपि
मजनो रागमयः कृतः ॥७४॥ एकांगरूपकं चैतदेवं द्विप्रभृतीन्यपि। अंगानि रूपयंत्यत्र योगायोगौ भिदाकरौ ॥७५॥
स्मितमेव पुष्पं तेनोज्ज्वलं स्मितपुष्पोज्ज्वलं लोलनेत्रभृंगमिदं मुखं। इति पुष्पद्विरेफाणां संगत्या युक्तरूपकं ॥७६॥ इति मंदस्मितज्योत्स्नं स्निग्ध मंदस्मितमेव ज्योत्स्ना यत्र
नेत्रोत्पलं मुखं। इति ज्योत्स्नोत्पलायोगादयुक्तं नाम रूपकं ॥७७॥ रूपणादंगिनोऽंगानां रूपणाऽरूपणाश्रयात्। रूपकं वि
षमं नाम ललितं जायते यथा ॥७८॥ मदरक्तकपोलेन मन्मथस्त्वन्मुखेंदुना। नर्तितभ्रूलतेनालं मर्दितुं भुवनत्रयं
॥७९॥ हरिपादः शिरोलग्नजह्नुकन्याजलांशुकः। जयत्यसुरनिःशंकसुरानंदोत्सवध्वजः ॥८०॥ विशेषणसमग्रस्य

© Dharmartha Trust J&K. Digitized by eGangotri

दं॰डी॰ २५ 15 रूपकं तेतो यदीदृशं । पदे तैस्य दर्पनो देत स्मविशेषणाद्रूपकं ॥ ८१ ॥ न मीलयति पद्मानि न नभोऽप्यवगाहते । त्वन्मुखेंदुर्मम्म
मासूनां हरणाय प्रवर्त्तते ॥ ८२ ॥ अक्रियाचंद्रकार्याणामन्यकार्यस्य च क्रिया । अत्र संदृश्यते यस्माद्विरुद्धं नामरू
पकं ॥ ८३ ॥ गांभीर्येण समुद्रोसि गौरवेणासि पर्वतः । कामप्रदत्वाल्लोकानामसि त्वं कल्पपादपः ॥ ८४ ॥ गांभीर्यप्रमुखे
नात्र हेतुभिस्सागरो गिरिः । कल्पद्रुमश्च क्रियते तदिदं हेतुरूपकं ॥ ८५ ॥ राजहंसोपभोगार्हं भ्रमरप्रार्थ्यसौरभं । सखि
वक्त्रांबुजमिदं तवेति श्लिष्टरूपकं ॥ ८६ ॥ इष्टं साधर्म्यवैधर्म्यदर्शनाद्गौणमुख्ययोः । उपमाव्यतिरेकाख्यं रूपकंत रामा॥
द्वितयं यथा ॥ ८७ ॥ अयमालोहितच्छायो मदेन मुखचंद्रमाः । सन्नद्धोदयरागस्य चंद्रस्य प्रतिगर्जति ॥ ८८ ॥ चंद्रमाः पी २५

यतेद्देवैर्म्मयात्वन्मुखचंद्रमाः ॥ असमग्रोप्यसौ शश्वदयमापूर्णमंडलः ॥ ८९ ॥ मुखचंद्रस्य चंद्रत्वमित्थमन्योपतापि
नः ॥ न ते सुंदरि संवादीत्येतदाक्षेपरूपकं ॥ ९० ॥ मुखेंदुरपि ते चंडि मां निर्दहति निर्दयं ॥ भाग्यदोषान्ममैवेति तत्सम
धानरूपकं ॥ ९१ ॥ मुखपंकजरंगेस्मिन् भ्रूलतानर्त्तकी तव ॥ लीलानृत्यं करोतीति रम्यं रूपकरूपकं ॥ ९२ ॥
नैतन्मुखमिदं पद्मं न नेत्रे भ्रमराविमौ ॥ एतानि केशराण्येव नैता दंतार्च्चिषस्तव ॥ ९३ ॥ मुखादित्वं निवर्त्त्यैव पद्मा
दित्वेन रूपणात् ॥ उद्भावितगुणोत्कर्षं तत्त्वापह्नवरूपकं ॥ ९४ ॥ न पर्यंतो विकल्पानां रूपकोपमयोरतः ॥ दिङ्मा
त्रं दर्शितं धीरैरनुक्तमनुमीयतां ॥ ९५ ॥ यत्रैकस्मिन्ननेकेषामारोपः प्रतिपद्यते ॥ तन्मालारूपकं नाम ममलालीला

© Dharmartha Trust J&K. Digitized by eGangotri

दं॰डी॰ १५ 15

प ३२

वलंबनात्॥९६॥ आलानं जयलक्ष्म्यास्त्व करिणः सेतुर्विपद्वारिधेः पूर्वाद्रिः करवालचंडमहसो लीलोपधा-
नं श्रियः॥ संग्रामामृतसागरप्रमथनक्रीडाविधौ मंदरो राजन् राजति वीरवैरिवनितावैधव्यदस्ते भुजः॥ ९७॥
॥ रूपकचक्रम्॥ ॥जातिक्रियागुणद्रव्यवाचिनैकत्रवर्त्तिना। सर्ववाक्योपकारश्चेत्तदाहुर्दीपकं यथा॥
९८॥ पवनो दक्षिणः पर्णं जीर्णं हरति वीरुधां। स एव च नतांगीनां मानभंगाय कल्पते॥ ९९॥ चरंति चतुरंभो-
धिवेलोद्यानेषु दंतिनः। चक्रवालाद्रिकुंजेषु कुंदभासो गुणाश्च ते॥ १००॥ श्यामलाः प्रावृषेण्याभिर्दिशो जीमूत- रामा॥
पंक्तिभिः। भुवश्च सुकुमाराभिर्नवशाद्वलराजिभिः॥ १०१॥ विष्णुना विक्रमस्थेन दानवानां विभूतयः। क्वापि- १५

लोकालोकाद्रिवनेषु। २

© Dharmartha Trust J&K. Digitized by eGangotri

ताः कृतोप्यासन्नानीता देवतद्वयः ॥२०२॥ इत्यादि दीपकान्सुक्तान्येवं मध्यान्तयोरपि वाक्ययोर्दर्शयिष्यामः ।
कानि चित्रानि तद्यथा ॥२०३॥ नृत्यंति निचुलोत्संगे गायंति च कलापिनः । बध्नंति च पयोदेषु दृशं हर्षाश्रुगर्भि
णीः ॥२०४॥ मदो योगं धवहः क्षारो वह्निरिंदुश्च जायते । चंद्रचंदनपातश्च शर्व प्रातः प्रवासिनां ॥२०५॥ जलं जलधरे
दर्श ४ जीर्णं कुलं गृहसिखंडिनां । चलं ब्रनडिंतां दाम बलं कुसुमधन्वनः ॥२०६॥ त्वयार्पितं त्वं करोस्मि रणेगाढं शरास
क्रिया ५ नो मयापि मरणे चेतस्त्वय्यमेतन्ममं कृतं ॥२०७॥ शुक्रः श्वेतार्चिषो वृद्धौ पक्षः पंचशरस्य सः । शं च रागस्य बाणोगोपि स्तु
नां रत्नमव प्रियः ॥२०८॥ इत्यादि दीपकं चैव पूर्वं पूर्वस्यापेक्षिणी ॥ वाक्यमाला प्रयुक्तोपि तन्मालादीपकं मतं ॥२०९॥
नीलोत्पति पद : २ काम : २
© Dharmartha Trust J&K. Digitized by eGangotri

दंडी. १६
16

अवलेपमनंगस्य वर्द्धयंति बलाहकाः ॥ कर्षयंति तु घर्मस्य मारुतोद्धूतसीकराः ॥११०॥ अवलेपपदेनात्र वहे लो
कपदेन च ॥ क्रिये विरुद्धे संयुक्ते तद्विरुद्धार्थदीपकं ॥११॥ हरत्याभोगमाशानां गृह्णाति ज्योतिषां गणं । आदत्ते
चाद्य मे प्राणानसौ जलधरावली ॥१२॥ अनेकशब्दोपादानात् क्रियैवैकात्र दीप्यते । यतो जलधरावल्यां तस्मा
देकार्थदीपकं ॥१३॥ हृद्यगंधवहास्तुंगास्तमालश्यामलत्विषः । दिवि भ्रमंति जीमूता भुवि चैते मतंगजाः ॥१४॥
अत्र धर्मैरभिन्नानामभ्राणां दंतिनां तथा ॥ भ्रमणेनैव संबंध इति श्लिष्टार्थदीपकं ॥१५॥ अनेनैव प्रकारेण शे — राम ॥
षाणामपि दीपके । विकल्पानामनुगतिर्विधातव्या विचक्षणैः ॥१६॥ अर्थावृत्तिः पदावृत्तिरुभयोरावृत्तिरेव च ॥ १६

© Dharmartha Trust J&K. Digitized by eGangotri

दीपकस्य । न एवेष्ट मलंकारद्वयं यथा ॥ १६ ॥ विकशन्ति कदम्बानि स्फुटन्ति कुटजद्रुमाः । उन्मीलन्ति च कं
दलोद्दलन्ति ककुभानि च ॥ १८ ॥ उक्तं वर्धति मेघानां मालां दृष्ट्वा कलापिनां ॥ यूनां चोत्कण्ठयत्यद्य मानसं मकर
ध्वजः ॥ १९ ॥ जित्वा विश्वं भवानत्र विहरत्यवरोधनैः ॥ विहरत्यप्सरोभिस्त्वद्वैरिवर्गो दिवं गतः ॥ २० ॥ प्रतिषेधो
क्तिराक्षेपस्त्रैकाल्यापेक्षया त्रिधा ॥ अथवास्य पुनराक्षेप्य भेदानन्त्यादनन्तता ॥ २१ ॥ अनंगः पंचभिः पौष्पैर्विश्वं १
व्यजयतेषुभिः । इत्यसंभाव्यमथवा विचित्रावयवाः शराः ॥ २२ ॥ इत्यनंगजयायोगबुद्धिर्हेतुबलादिह । प्रवृत्ते
व यथा हि साक्षादाक्षेपस्य भेदीहशाः ॥ कुतः कुवलयं कर्णे करोषि कलभाषिणि ॥ किमपांगमपर्याप्तमस्मिन्क

दी १

© Dharmartha Trust J&K. Digitized by eGangotri

दं॰डी॰ २७ म्भिणिमिच्यसे ॥२४॥ सर्वस्मिन्नाक्षेपोयं क्रियते वासितोत्पलं ॥ कस्मै कश्चित्प्रियेणोर्वं वद्धकोरण्ये वध्यते ॥
२५॥ सत्यं ब्रूहि [illegible] स्मिन्नर्वं मां द्रष्टुं वद्धन्न लक्ष्यसे ॥ अन्यासु युवतसंक्रान्तलाक्षारक्तेन चक्षुषा ॥ सोयं त्वविषयोद
क्षेपः प्रागेवातिमनस्विनी ॥ कदाचिदपराधोयं स्यात्तवेत्यवमन्तुं ध्येयः ॥२७॥ तव तत्वं गिमिथ्यैव द्दढमंगिगोष्ठु
मा दूषितां यदि सत्यं स्युस्तद्व्यैव किमकाण्डे त्यजन्ति माम् ॥२८॥ धर्माक्षेपोयं धर्मा क्षिप्समेगणागात्वमादृष्टवशा कामुकं
न यदैवं कर्मणा तद्विरोधिना ॥२९॥ सुंदरी मानवत्येषु विवेकः केन जायते ॥ प्रसर्पितं हितं रत्नं दृष्टपतेन ना रामः ॥
दाश्रयः ॥३०॥ धर्म्याक्षेपोयमाक्षिप्तो धर्मी धर्ममिष्टलाक्षपश्च ॥ अनुज्ञायान्वितं रूपमत्यास्वयोर्विवक्षितो ॥३१॥ न २७

=अकस्मात्२ ३२

© Dharmartha Trust J&K. Digitized by eGangotri

स्फुला: २ — मनाम स्पां २

कुर्वीतिस्वरजो ते स्फुरत्यधरपल्लवः । तुवोवधुमेन तथांघ्रिउष्टघ्र्यांसिमिमेयम् ॥ ३२ ॥ सत्यं सकारणाद्दोषः प्रध्या
नं कारणांत्तियः । स्वापराधोन्निषिद्धौ यत्प्रियेणापटीयसा ॥ ३३ ॥ इ दैं प्रियतमः सोद्य मां गतो जलदागमः । दृष्ट्वा
श्वकुल्लानिद्भुलान मृतास्मीति किं विदन् ॥ ३४ ॥ कार्यो दोषः सकार्येष्वानिवर्तनिर्हि तत्कारणं सुखं श्रद्दधा दारुणं
जलदागम म् ॥ ३५ ॥ न चिरं मम तापाय तव यात्रा भविष्यति । यदि यास्यसि यातव्यमलमाशंकया त्व ते ॥ ३६ ॥ इत्थं
तुङ्गाः सुखेनैव काः स्मारस्यापि द्विष्यते गतिः । मरणं स्वयंत्यैव सोढुं जातेपदृष्यते ॥ ३७ ॥ धनं चर्व कुलध्वनिसुरदं
देमैं सुखं त्विमिनि ॥ न चमे प्राणसंदिष्ट तथापि प्रियमास्मगाः ॥ ३८ ॥ इत्यं चक्षाणया हित्वा प्रिययावौ नितुबंधिनः । प्रभुवेनैं

नयें २

© Dharmartha Trust J&K. Digitized by eGangotri

दं॰डी॰ वत्सत्वाम्प्रष्टुर्वो क्षेपइहेश: ॥ ३९॥ जीविताशा बलवती धनाशा दुर्बला मम । गच्छ वा तिष्ठ वा कान्त स्वावस्थातो

१८ निवेदिता ॥ ४०॥ असावनादराक्षेपो यदनादरवत्त्वं: प्रिय प्रयाणं त्वं वेत्या प्रयुक्तमिह रक्तया ॥ ४१॥ गच्छ गच्छसि

18 चेत्कान्त पन्थान: सन्तु ते शिवा: । ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥ ४२॥ इत्याशीर्वचनाक्षेपो यदाशीर्वि

दवर्त्मना ॥ स्वावस्थां हि स्वयं स्पैवं कान्तया न निषिध्यते ॥ ४३॥ यदि सत्यैव यात्रा ते काप्यन्या मृग्यतां त्वया । अहमद्यैव

रुद्धास्मि रन्ध्रापेक्षेण मृत्युना ॥ ४४॥ इत्येष परुषाक्षेप: परुषाक्षरपूर्वकम् । कान्तस्याक्षिप्यते यस्मात्प्रस्थानं प्रे रामा॥

मनिघ्नया ॥ ४५॥ गन्ता चेद्गच्छ तूर्णं ते कर्णौ यान्ति पुरा रवा: । आर्तबन्धुमुखोद्गीर्णा: प्रयाणप्रतिबन्धिन: ॥ ४६॥ स १८

यास्यंतीत्यर्थः

© Dharmartha Trust J&K. Digitized by eGangotri

प्रियगमनत्रये ३ प्र सम्यवीवद२ प्रेम्णः ४

त्विद्याक्षेपं विषं [illegible] यदत्र प्रतिषिध्यते । प्रियप्रयाणं सा त्विद्यं कर्त्र्या स्वैकांतरत्नया ॥४७॥ गच्छेति वक्तुमिच्छा
मि त्वत्प्रियं मत्प्रियैषिणी । निर्गच्छति मुखाद्वाणी मा गा इति करोमि किं ॥४८॥ यत्नाक्षेपः स यत्नस्य कृतस्यानि

गमननिषेधः

ष्टवस्तुनि । विपरीतफलोत्पत्तेरानर्थक्योपदर्शनात् ॥४९॥ क्षणदर्शनविघ्नाय पक्ष्मस्पंदाय कुप्यतः
वृहि प्रेम्णः प्रयाणं त्वं मया तस्मिन्निषिध्यते ॥५०॥ अयं परवशाक्षेपो यत्प्रेम परतंत्रया । तया निषिध्यते यात्रे
तास्यार्थस्योपसूचनात् ॥५१॥ सहिष्ये विरहं नाथ देह्यदृश्यांजनं मम । यदक्तनेत्रां कंदर्पः प्रहर्त्ता मां
न पश्यति ॥५२॥ दुःकरं जीवनोपायमुपन्यस्योपरुध्यते । पत्युः प्रस्थानमित्याहुरुपायाक्षेपमीदृशम् ॥५

दर्शनार्थ २२

© Dharmartha Trust J&K. Digitized by eGangotri

निर्न्नैबेषेयैत्र्याशून्यः२ कायवा अनः लोभ पुन्नया २

त्रामंधि तस्तर्वैत्वेपि सस्वी त्रयमा त्रादेति

दै.डी. १९ ३॥ प्रवृत्तैर्वैप्रयामीति वाणीवल्लसतेसुरवाशय्यन्तौ ॥ पिबन्येदानीमंदस्पेम्रामामा ॥ सिकिश ॥५४॥ रोषादेयो

यंसुड्डिरुान्ने ह निर्यज्ञागात्मना ॥ सीरस्त्रया ॥ प्रियारवं प्रयाणंयन्निडध्यते ॥५५॥ नाघ्रातंन कृतकसेव्रि

19 तिर्म्मस्तुनिना ॥ प्यिति ॥ वृद्धिघांदी ॥ दिकाप्तेवाविरी संनिलवृत्त्यल्नौ ॥५६॥ इत्यंडको शतांदोपः सत्तुको

जि शंमिवोत्यत्तौ ध्यावर्षकम्मित घोगपंशोच्चावस्थोपदर्शनाय ॥५७॥ अथोनिमिसंभृत्तः कश्चिन्नविद्याकाचि

२ दंतानतयः मंचितं ॥ किंचिज्जतंचसकलीवयः ॥५८॥ असावडशाया दोपोयस्मादंडशयोऽसरश ॥ अथर्जि रामा॥

नादेर्धात्वृत्तिर्दिशिति हिंगताशुध ॥५९॥ किंमयशिरदस्रोदः किंवाहंसकदेवकौ ॥ इतीहसुरमंवादिक्रूयतेत १९

© Dharmartha Trust J&K. Digitized by eGangotri

न्तीयदः॥६०॥ इत्ययं संशयाक्षेपः संशयोयं निवर्त्यते। धर्म्मेण ईसमतुलतेनास्पृष्टघनजातिना॥६१
च्युतात्मनि पद्मानां दृष्टिरिस्निग्धतारका। मुखेंदो तवसत्यस्मिन्नपरेण किमिन्दुना॥६२॥ इति मुखें
दुरान्निश्चयो गुणानां णोन्नुवर्त्तिनः। तत्समासेन मा स्यायिवेहाश्लिष्टाक्षेपपदीहृतः॥६३॥ चित्रमाक्रान्तवि
श्वोपि विक्रमस्तेन तस्य नीति। कदावा दृश्यते तस्य पितुर्दीप्सितहृद्विभञ्जः॥६४॥ अयमर्थान्तराक्षेपः प्रक्रा
न्तोयं निवर्त्यते। विस्मयोर्थान्तरस्थो हृद्दर्शनात्सधर्म्मिणः॥६५॥ स्मृत्ययमेददास्सो तिनेरं द्रजैकदाकुत्र।
सम्भवमत्र चारक्रन्नियतत्सप्तनमाधितिनः॥६६॥ एवमादिरिहाक्षेपो हेत्वाक्षेप इति स्मृतः। अनयैव दिशाध्येयोपि

© Dharmartha Trust J&K. Digitized by eGangotri

वाच्यं=प्रक्रम १ सो॰२

दं॰डी॰ २० विकल्पः शक्यमूहितुं ॥६७॥ ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किंचन । तत्साधनसमर्थस्य न्यासो योऽ
न्यस्य वस्तुनः ॥६८॥ विश्वव्यापी विशेषस्थः श्लेषाविद्धो विरोधवान् । अयुक्तकारी युक्तात्मा युक्तायुक्तो
विपर्ययः ॥६९॥ इत्येवमादयो भेदाः प्रयोगेष्वस्य लक्षिताः । तदाहरणमालैषा रूपव्यक्त्यै निदर्श्यते ॥७०॥
भगवन्तौ जगन्नेत्रे सूर्याचन्द्रमसावपि । पश्य गच्छत एवास्तं नियतिः केन लङ्घ्यते ॥७१॥ पयोमुचः परीतापं
हरन्त्येते शरीरिणां । नन्वात्मलाभो महतां परदुःखोपशान्तये ॥७२॥ उत्पादयति लोकस्य प्रीतिं मलयमा राम॥
रुतः । ननु दाक्षिण्यसंपन्नः सर्वस्य भवति प्रियः ॥७३॥ जगदाह्लादयत्येष मलिनोऽपि निशाकरः । अनुगृ २०

दक्षिण दिक्तवो दक्षिणः सरल इति श्लेषः १ देवानतिक्रमो विम्बं व्याप्नोति ३

© Dharmartha Trust J&K. Digitized by eGangotri

ती २ … लिनी २२

न्नाति हि परं सदोषोऽपि द्विजेश्वरः ॥ ७४ ॥ मधुपानकलाङ्कं गा निर्गतोऽयं निलाम्बनः । कर्ड्डुलवर्त्तिकणाद्य

कामिनी पापमीदृशम् ॥ ७५ ॥ अयं मम दहत्यङ्गमम्भोजदलसंस्तरः । हुताशनप्रतिनिधिर्दाहात्मा ननु यु

ज्यते ॥ ७६ ॥ इतिर्विकामं श्रीतिथिषु किं वसन्तोऽनुनोति मां । मलिनाचरितं कर्म सुरभेर्नन्वसाम्प्रतम् ॥ ७७ ॥

अस्तु दाहाय पिदाहाय किमङ्गः कमलाकरः । न हंडे गृहेषु युष्मेषु सूर्य गृह्योऽम्बुडुतिवेशः ॥ ७८ ॥ शाद्वलोपारोप्र

तीतेवासादृश्ये वस्तुनोर्द्वयोः । तत्र यद्भेदकथनं व्यतिरेकः स कथ्यते ॥ ७९ ॥ धैर्यलावण्यगाम्भीर्यप्रमुखैस्त्वं

मुदन्वतः । गुणैस्तुल्योऽसि भेदस्तु वपुषैवेदृशेन ते ॥ ८० ॥ इत्येकव्यतिरेकोऽयं धर्मेणैकत्र वर्तिना । स्व

=उपमानोपमेययोर्नैकस्य द्वयोर्वा २ … =माहात्म्य २२

© Dharmartha Trust J&K. Digitized by eGangotri

दे॰ड॰ २१ 21

तीति विषयप्रासेऽर्द्धे दृश्योऽस्तघवर्त्मनि ॥८१॥ द्युलिन्नवेलोगन्तीरार्थंद्रुराशिस्तिवान्नपि । स्थशौ कैजनश्शै
काहस्थ्यीडवामीकरश्छविः ॥८२॥ नत्तयद्व्यतिरिक्तोऽयं सुत्तयेस्तिदिकोऽशुगो । कार्ष्णोऽपि संगतत चौर्यौयत्स्थ
गं दर्शितो विहा ॥८३॥ वैमसुङ्गच्छुदुर्वारो महस्सञ्चोसत्तेजसो ॥ इयंता त्युवयेस्तिदिः संजडात्मा पडुत्वाह ॥८
४॥ सप्तवक्षेपद्रूपञ्चामक्षेप इति पृथ्यतां ॥ माद्येपृष्ठमसेत्त्वशुद्रूपितेतदपिच्छ्यो ॥८५॥ स्थितिमानापि
धीरोऽपि रत्नानामाकरोऽपि समशः तत्वकश्चां न यात्येवं मलिनो मकरालयः ॥८६॥ वहन्नपि महीं द्वयं संसरोल रामा ॥
द्वीपशैगरान्तर्श्रीतावाद्रभुजंगानां शेषस्त्वन्तो निष्कृष्यते ॥८७॥ शाङ्के पा... सा हस्यो व्यतिरिक्तोऽयमीदृशः ॥ २१

=ऋषी शनयो=

नौर

© Dharmartha Trust J&K. Digitized by eGangotri

प्रतीयमानसादृश्योऽप्येषांश्चिसोद्धविधीयते ।।७८।। त्वन्मुखं कमलं चैतिद्ध्योरध्यनयोर्स्तिदा । कमलं जलसंरो
हि त्वन्मुखं च पाश्रयं ।।७९।। त्वन्मूर्विलाशीमस्पृष्टमदरागं स्पृशोदृशां । इदं तु नयनद्वन्द्वं तव तद्गुणभूषितं ।।
८०।। पूर्वावस्मिन्नेदमास्ते किंरस्मिन्नाधिक्यदर्शनं । सादृश्यव्यतिरेकश्च पुनरन्यःप्रकल्पते ।।८१।। त्वन्मुखं
पुण्डरीकं च फुल्लैस्तुरलिगंधिनी ।। भ्रमद्भ्रमरसंसक्तं लोलदृष्टिमुखं तु तत् ।।८२।। त्वं जयं भ्रमरोत्रसोऽहं सोऽयंस्ते
यद्भूषर्गाः ।। नत्तोनवत्त्रमालीदं मिदं कुमुदं पपघः ।।८३।। प्रतीयमानसौन्दर्यादिसादृश्ययोर्विंयद्दर्शसोः ।।
कल्पतातिष्ठश्लोष्य तदोस्मिरवंदृश्यते ।।८४।। पूर्ववच्चशब्दस्य साम्यसुतयत्रो । पितेद्रको । गिनेत्रा । दि

© Dharmartha Trust J&K. Digitized by eGangotri

मुद्री ३:४ हाः

दंडी॰ २२ नुल्यैतस्मादृश्यद्युतिरेकिता ॥ ९५ ॥ अरत्नालोकसंहार्यमहार्यं सूर्यरश्मिभिः । दृष्टिरोधकरं यूनां यौवन
प्रभवं तमः ॥ ९६ ॥ संजातिद्युतिरेकोऽयं तमो जातेरिदं तमः । दृष्टिरोधितया त्वल्यं त्विन्नमन्यैरदर्शियर ॥
22 ९७ ॥ प्रसिद्धहेतुव्यावृत्त्या यत्किंचित्कारणांतरं । यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावना ॥ ९८ ॥ अपी तैं ३
तन्नावक्रादेव मसंसृष्टामलांबरी । अप्रसादितसूक्ष्मांबु जगदासीन्मनोहरं ॥ ९९ ॥ अनंजितासिता दृ शारदि ४
ष्टिर्भ्रूरनावर्जिता नता । अरंजितोऽरुणश्चायमधरस्तव सुंदरि ॥ १०० ॥ यदपीतादिजन्यं स्याद्रक्तं वक्रादृश्य राम ॥
हेतुकं । स्वहेतुकं तत्स्वेहविवक्षितं विभुद्धता ॥ १ ॥ वक्त्रं निसर्गसुरभि विभ्रमस्याज्ञसुंदरी । अकारणारिपुं २२

मु॰

© Dharmartha Trust J&K. Digitized by eGangotri

ष्टिद्रो निर्निमित्तैर्दुहृद्भ्रमरः ॥ २ ॥ निसर्गादपि देवैर्न हेतुः साहचर्याद्विवर्तिनः । तत्कं वसुरतिवादिफलंतस्य

वितालवनः ॥ ३ ॥ वसंतं किं चिद्दिलिप्रेत्य तत्तुल्यच्छायां च्यवरूकन्तः । तत्किसं दर्शिहदुपवादश्रांसमासो रिरिष्यते ॥

